स्त्रियां जातित्वात् ङीष्। २रङ्गे ३खङ्गे च हेमच०।

**टिक** गतौ भ्वा० आ० सक० सेट्। टेकते अटेकिष्ट टिटिके। ऋदित् अटिटेकत् त।

**टिटिभ** पुंस्त्री० टिटीति अव्यक्तशब्दं भणति भण—ड। कोयष्टिके(टिटिरि)स्त्रियां ङीष् स्वार्थे क तत्रार्थे अमरः।

**टिट्टिभ** पुंस्त्री० टिट्टीत्यव्यक्तं शब्दं भणति भण—ड।(टिटिरि) कोयष्टिके खगे अमरः स्त्रियां ङीष्। "अनिर्द्दिष्टां-श्चैकशफांष्टिट्टिभांश्च विवर्जयेत्" मनुना तन्मांसभक्षणं निषिद्धम्। "टिट्टिभं तदुपेत राज्यध्यानमिवातुरः" भा० शा० १११अ०। कोयष्टिकशब्दे २२६६ पृ० तन्मांस-गुणा उक्ताः। टिट्टिभक स्वार्थे क। तत्रार्थे पुंस्त्री०।

**टिण्टिनिका** स्त्री अम्बुशिरीषिकायां (जेँाक) भावप्र०।

**टिण्डिश** पु० रोमशफले (ढाँडश) ख्याते वृक्षभेदे राजनि०। "टिण्डिशो रुचिकृत् भेदी पित्तश्लेष्माश्मरीप्रणुत्। सुशीता वातला रूक्षा मूत्रला च प्रकीर्त्तिता" भावप्र०।

**टिप** नोदने चुरा०उभ०सक०सेट्। टेपयति-ते अटीटिपत्-त।

**टिप्पनी** स्त्री टिप-क्विप् टिपा पन्यते स्तूयते पन—घञर्थे क गौरा०ङीष्। टीकायाम्। सा च टीकाव्याख्यारूप-तयैव व्यवह्रियते यथा चिन्तामणिटीकाया दीधितिव्या-ख्यायाः टीका जगदीशकृता गदाधरकृता च। यथा शारीरिकसूत्रभाष्यव्याख्या पञ्चपादिका भामती च। महाभाष्यव्याख्या कैयटकृता इत्यादि। प्रथमव्याख्याया-मपि क्वचित् प्रयुज्यते यथा "श्रीमतङ्गानन' नत्वा-लीलावत्याः सुटिप्पणी। भवेशेन सुबोधार्थं क्रियते यद्गुरोः स्तुतम्" "टिप्पनी दायभागस्य श्रीनाथेन विधीयते"। [ऋदित्। अटिटीकत् त।

**टीक** गतौ भ्वा० आत्म० सक० सेट्। टीकते अटीकिष्ट।

**टीका** स्त्री टीक्यते गम्यते ग्रन्थार्थोऽनया। टीक—करणे घञ् घञर्थे क वा। विषमपदव्याख्यारूपे ग्रन्थभेदे। "अपटीको जडो माघे भृशं जाड्येन ताड्यते। स च किञ्चित्तरत्येव कण्ठसंलग्नवल्लभः" उद्भटः। "नत्वा भगवतीं दुर्गां टीकां दुर्गार्थबुद्धये। कुरुते दायभागस्य भट्टाचार्यमहेश्वरः" "करोति टीकामिह दायभागग्रन्थावबोधाय सदेकरस्याम्" श्रीकृष्णतर्का०।

**टुण्टुक** पु० स्त्री टुण्टु इत्यव्यक्तं कायति कै—क। (टुण्टुनि) १पक्षिभेदे शब्दर०। स्त्रियां जातित्वात् ङीष्। २शोणा-कवृक्षे अमरः। ३कृष्णखदिरे शब्दच०। तयोः तत्खग-प्रियत्वात् तथात्वम्। ४अल्पे त्रि० मेदि०। ५क्रूरे त्रि० विश्वः। ६टङ्किनीवृक्षे स्त्री शब्दच०।

**टुनाका** स्त्री तालमूलीवृक्षे शब्दच०।

**टेरक** त्रि० केकर+पृषो०। (टेरा) केकरनेत्रे। शब्दार्थचि०।

**टोट** त्रि० त्रोट+पृषो०। १अल्पे २हीने च। स्त्रियां गौरादिपाठात् ङीष्।

**टोड़लतन्त्र** न० तन्त्रभेदे। [ट्वलः ट्वालः।

**ट्वल** विप्लवे भ्वा० पर० अक० सेट्। ट्वलति अट्वालीत् ज्वला०

इति वाचस्पत्ये टकारादिशब्दार्थसङ्कलनम्।

---

## ठ

ठकारो व्यञ्जनवर्णभेदः। टवर्गीयः मूर्द्धन्यः अर्द्धमात्रा-कालोच्चार्य्यः। तस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासाघोषा महाप्राणश्च बाह्यप्रयत्नाः। मातृन्यासेऽस्य दक्षजानुनि न्यस्यता वर्णा-भिधानेऽस्य वाचकशब्दा उक्ता यथा "ठः शून्यो मञ्जरी जीवः पाशिनी लाङ्गलं क्षमा। वनजो नन्दनो जिह्वा सुनन्दाघूर्णकः सदा। वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्र-मण्डलः। दक्षजानूरुभावश्च देवभक्षो वृहद्ध्वनिः। एकपादो विभूतिश्च ललाटं सर्वमित्रकः। वृषघ्नो नलिनी विष्णुर्महेशो ग्रामणीः शशी"। एतदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम्। सुन्दरीं षोड़शभुजां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "ठकारं चञ्चलापाङ्गि, कुण्डली मोक्षरूपिणी। पीतविद्युल्लताकारं सदा त्रिगुण-संयुतम्। पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा। त्रिविन्दुसहितं वर्णं त्रिशक्तिसहितं सदा" इति काम-धेनुतन्त्रम्। मात्रावृत्तेऽस्य प्रथमोपन्यासे दुःखं फलम् भशब्दे प्रमाणं दृश्यम्।